सधर्म्मिणी, स्त्री, (सह धर्म्मोऽस्या अस्तीति । "धर्म्मशीलवर्णान्ताच ।" ५ । २ । १३२ । इति इनिः । "वोपसर्जनस्य ।" ६ । ३ । ८२ । इति सहस्य सः ।) भार्य्या । यथा,—

"सुवासिनी वधूटी स्वाविरण्टाच सधर्म्मिणी ।
पत्नी सहचरी पाणिगृहीती गृहिणी गृहा ॥"
इति हेमचन्द्रः ॥

सधर्म्मा, [न्] त्रि, (सह धर्म्मोऽस्यास्तीति । "धर्म्मशीलवर्णान्ताच ।" ५ । २ । १३२ । इति इनिः । "वोपसर्जनस्य ।" ६ । ३ । ८२ । इति सहस्य सः ।) समानधर्म्माचारी । यथा,—

"पशूनां समजोऽन्येषां समाजोऽथ सधर्म्मिणाम् ॥"
इत्यमरः ॥

सधवा, स्त्री, (धवेन भर्त्रा सह वर्त्तमाना ।) जीवत्पतिका । तत्पर्य्यायः । सभर्त्तृका २ पतिवत्नी ३ सनाथा ४ । इति जटाधरः ॥ अस्या धर्म्मा यथा,—

"भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्म्मो ह्यमायया ।
तद्वन्धूनाञ्च कल्याण्यः प्रजानाञ्चानुपोषणम् ॥
दुःशीलो दुर्भगो वृद्धो जड़ो रोग्यधनोऽपि वा ।
पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

सधिः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

सधिः, [स्] पुं, (सहते इति । सह + सहेर्धंच ।" उणा० २ । ११४ । इति इसिन् धश्चान्तादेशः ।) वृषभः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

सध्रीची, स्त्री, (सह अञ्चति या सा । अञ्च + ऋत्विगादिना क्विन् । सहस्य सध्रिः । अञ्चतेश्चोपसंख्यानं इति ङीप् । अच इत्यकारलोपः । चाविति दीर्घः ।) सखी । इति हेमचन्द्रः ॥ (यथा, भट्टिः । ६ । ७ ।

"सीतां सौमित्रिणा त्यक्तां सध्रीचीं वक्षुमैकिकाम्
विज्ञायामंस्त काकुतस्थः चयैं चेमं सुदुर्लभम् ॥")

सध्र्यङ्, [च्] त्रि, (सह अञ्चतीति । अञ्च गतौ + ऋत्विगादिना क्विन् । सहस्य सध्रिः ।) सहचरः । इत्यमरः ॥ (यथा, भागवते । २ । ७ । ४७ ।

"सध्र्यङ् नियम्य यतयो यमकर्त्तहेतिं ।
जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥"

सम्यक् । यथा, तत्रैव । ४ । २७ । १ ।

"इत्थं पुरञ्जनं सध्र्यग्वशमानीय विभ्रमैः ।
पुरञ्जनी महाराज रेमे रमयती पतिम् ॥")

सन्, पुं, व्याकरणीयप्रत्ययविशेषः । तत्सूत्रादि यथा । सन्निच्छायाम् । धोः परः सन् स्यादिच्छायाम् । अत्तुमिच्छति जिघत्सति । इति मुग्धबोधव्याकरणे सनन्तपादः ॥*॥ प्रथमैकवचनान्तपुंलिङ्गसन्शब्दरूपोऽप्येवम् । तदुदाहरणम् । यथा,—

"रामं नमति सानन्दं धर्म्मानभिनिविश्य सन् ॥"
इति तत्रैव कारकपादः ॥

सनः, पुं, स्त्री, हस्तिकर्णस्फालः । यथा । कर्णस्फाले सनः सनी । इति शब्दरत्नावली ॥

सनः, पुं, घण्टापाटलिवृक्षः । इति शब्दचन्द्रिका ॥ (सनत्कुमारः । सनकः । सनन्दनः । सनातनः । दाने, क्लो । अखण्डिते, त्रि ॥ यथा, भागवते । २ । ७ । ५ ।

"तप्तं तपो विविधलोकसिसृक्षया मे
आदौ सनात् स्वतपसः स चतुःसनोऽभूत् ॥"

"स हरिः चतुःसनोऽभूत् । सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः । कथम्भूतात् स्वतपसः सनात् अखण्डितात् यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः सनु दाने ।" इति तट्टीकायां श्रीधरस्वामी ॥)

सनकः, पुं, विष्णुपारिषभेदः । इति शब्दरत्नावली ॥ स तु ब्रह्मणश्चतुष्पुत्रान्तर्गतपुत्रविशेषः । यथा,—

"दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ।
भगवद्ध्यानपूतेन मनसान्यांस्ततोऽसृजत् ॥
सनकञ्च सनन्दञ्च सनातनमथात्मभूः ।
सनत्कुमारञ्च मुनीन् निष्क्रियानूर्द्ध्वरेतसः ॥
तान् बभाषे स्वभूः पुत्त्रान् प्रजाः सृजत पुत्त्रकाः ।
तन्नैच्छन्मोक्षधर्म्माणो वासुदेवपरायणाः ॥"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥

तस्य वासस्थानं जनलोकः । इति काशीखण्डम् ॥

सनत्, पुं, ब्रह्मा । इति त्रिकाण्डशेषशब्दरत्नावल्यौ ॥

सनत् व्य सर्व्वदा । इत्यमरटीकायां रामाश्रमः ॥

सनत्कुमारः, पुं, (सनतो ब्रह्मणः कुमारः ।) ब्रह्मणः पुत्त्रः । तत्पर्य्यायः । वैधात्रः २ । इत्यमरः ॥ वैधातकिः ३ । इति भरतः ॥ धातृपुत्त्रः ४ विधायः ५ । इति शब्दरत्नावली ॥ तन्नामव्युत्पत्तिर्यथा । सनत् ब्रह्मा तस्य कुमारः सनत्कुमारः । सनित्यकुमारस्तेन सनत्कुमारो वापीति स्वामिमतम् । इति भरतः ॥ तन्नामकारणम् । यथा,—

"यथोत्पन्नस्तथैवाहं कुमार इति विद्धि माम् ।
तस्मात् सनत्कुमारेति नामैतन्मे प्रतिष्ठितम् ॥"
इति महाभारते हरिवंशः ॥*॥

स च धर्म्मस्यौरसेन अहिंसायां जातः पश्चात् ब्रह्मणो दत्तपुत्त्रः । अयं साध्यगणः । यथा,—

श्रीनारद उवाच ।

"कोऽयं सनत्कुमारेति यस्योक्तं ब्रह्मणा स्वयम् ।
तवापि तेन गदितं वद मामनुपूर्व्वतः ॥"

पुलस्त्य उवाच ।

धर्म्मस्य भार्य्याहिंसाख्या तस्यां पुत्त्रचतुष्टयम् ।
सञ्जातं मुनिशार्दूल योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः ॥
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपिकनीयसाम् ।
ज्ञानमाद्यं महायोगं कपिलादिन् चावदत् ॥
सनत्कुमारश्चाभ्येत्य ब्रह्माणं कमलोद्भवम् ।
अपृच्छद्योगविज्ञानं तमुवाच प्रजापतिः ॥
कथयिष्यामि ते सांख्यं यदि पुत्त्रेति मे वचः ।
शृणोषि कुरुषे तच्च ज्ञानं सांख्यं श्रुतो भव ॥
पितामहवचः श्रुत्वा साध्यः प्राह तपोधन ।
सत्यं हि तव पुत्त्रोऽहं देव योगं वदस्व माम् ॥
तमुवाच महायोगी त्वन्मातापितरौ यदि ।
दास्येते च ततः सुतुर्दायादो मेऽसि पुत्त्रकः ॥
सनत्कुमारः प्रोवाच दायादपरिकल्पना ।
येषां हि भवता प्रोक्ता तान् मे व्याख्यातुमर्हसि ॥
तदुक्तं साध्यमुख्येन वाक्यं श्रुत्वा पितामहः ।
प्राह प्रहस्य भगवान् शृणु वत्सेति नारद ! ॥"
इति वामने ५७ । ५८ अध्यायौ ॥

स च पञ्चहायनवयस्कः चूड़ादिसंस्कारवेदसन्ध्याविहीनश्च । यथा,—

"तच्छ्रुत्वा सृञ्जयो राजा रत्नभूषणभूषिताम् ।
गृहीत्वा कन्यकां रम्यां नारदाय ददौ मुदा ॥
गृहीत्वा च सभार्य्यं तं पुत्त्रं धाता मुदान्वितः ।
प्रययौ ब्रह्मलोकञ्च देवेन्द्रैर्मुनिभिः सह ॥
तत्राजगाम नग्नश्च प्रज्वलन् ब्रह्मतेजसा ।
सनत्कुमारो भगवान् साक्षाच्च बालको यथा ॥
सृष्टेः पूर्व्वञ्च वयसा यथैवं पञ्चहायनः ।
अचूड़ोऽनुपवीतश्च वेदसन्ध्याविहीनकः ॥
कृष्णेति मन्त्रं जपति यस्य नारायणो गुरुः ।
अनन्तकालकल्पश्च भ्रातृभिश्च त्रिभिः सह ॥
वैष्णवानामग्रणीश्च ज्ञानिनाञ्च गुरोर्गुरुः ।
आराद्दृष्ट्वा नारदस्तं भ्रातरञ्च सतां वरम् ॥
सहसा शिरसा भूमौ दण्डवत् प्रणनाम तम् ।
उवाच नारदं बालः प्रहस्य परमार्थकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२९ अध्यायः ॥

जिनमते द्वादशसार्व्वभौमान्तर्गतसार्व्वभौमभेदः इति हेमचन्द्रः ॥

सनन्दः, पुं, ब्रह्मणः पुत्त्रचतुष्टयान्तर्गतपुत्त्रविशेषः स तु जनलोकवासी । इति काशीखण्डम् ॥ ॥ स एव दिव्यमनुष्यः । अस्य तर्पणं निवीतिना प्रत्यङ्मुखेन प्राजापत्यतीर्थेन सागमेन कर्त्तव्यम् तदितरेण उदङ्मुखेन कर्त्तव्यम् । यथा दक्षः ।

"प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मनुष्यांस्तृप्येत पितॄन् दक्षिणतस्तथा ॥
अग्रैस्तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः ।
पितॄंस्तु कुशमूलाग्रै र्विधिः कौशो यथाक्रमम् ॥
कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्त्रानृषींस्तथा ॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥"

अनेनाञ्जलिदयम् यथा,—

"एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः ।
अर्हन्ति पितरस्त्रीन् स्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम् ॥"

परिशिष्टप्रकाशधृतं सामवेदीयषट्त्रिंशद्ब्राह्मणम् । मनुष्याणामेवा दिक् या प्रतीचीति । तथा च ज्योतिष्टोमे श्रूयते । प्राचीं